**Roll No. ....................................**

# D–4015

## शास्त्री (तृतीय वर्षे) परीक्षायाम्, 2020

**‘क’ वर्गे**

**साहित्यविषये**

षष्ठं प्रश्नपत्रम्

**समयः—घण्टात्रयम् ]** **[ सम्पूर्णाङ्काः—100**

**सूचना** : सर्वे प्रश्नाः समाधेयाः।

1. कयोश्चित **द्वयोः** सोदाहरणं व्याख्या विधातव्या— 20
   (i) श्रुतिकटु परुषवर्णरूपं दुष्टम्
   (ii) अप्रतीतं यत्केवले शास्त्रे प्रसिद्धम्
   (iii) ग्राम्यं यत्केवले लोके स्थितम्
   (iv) अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र

2. कयोश्चिद् **द्वयोः** सोदाहरणं व्याख्या विधेया— 20
   (i) यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते।
   श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥
   (ii) अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः। यमकम्॥
   (iii) तद्रूपकमभेदो य उपमानोपमेययोः।





3. आचार्यमम्मटमतेन कस्यचिदेकस्य अलङ्कारस्य भेदान् विवेचयत— 20
   (i) अनुप्रासालङ्कारः
   (ii) उपमालङ्कारः
   (iii) अप्रस्तुतप्रशंसालङ्कारः

4. कयोश्चिद् **द्वयोः** अलङ्कारयोः सोदाहरणं व्याख्या उपस्थापनीया— 20
   (i) अतिशयोक्तिः
   (ii) दृष्टान्तः
   (iii) समासोक्तिः
   (iv) उपमेयोपमा
   (v) अनुमानम्

5. कयोश्चिद् **द्वयोः** उदाहरणयोः अलङ्कारं चित्वा सलक्षणं विवेचनं कुरुत— 20
   (i) न केवलं भातिनितान्त कान्तिः
   नितम्बिनी सैव नितम्बिनीव।
   यावद्विलासायुधलास्यवासास्-
   ते तद्विलासा इव तद्विलासाः॥

(ii) अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्कोनैवाऽयं विलसति शशाङ्कस्य वपुषि।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ताशेते रजनिरमणी गाढमुरसि॥

(iii) निजदोषावृत्तमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥

(iv) अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः।
उभयेन विना मनोभवस्फुरितं नैव चकारित कामिनोः॥